International Journal of Sanskrit Research 2014; 1(1): 35-40

International Journal of Sanskrit Research
अनन्ता

ISSN Number: 2394-7519
IJSR 2014; 1(1): 35-40
© 2014 IJSR
www.anantaajournal.com
Received: 19-09-2014
Accepted: 25-10-2014

डा. के.तारकरामकुमारशर्मा
उपाचार्यः, कृष्णयजुर्वेदविभागः
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः,
तिरुपतिः, आंध्र प्रदेश, भारत

Correspondence
डा. के.तारकरामकुमारशर्मा
उपाचार्यः, कृष्णयजुर्वेदविभागः
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः,
तिरुपतिः, आंध्र प्रदेश, भारत

# वर्णोत्पत्तिः – एकमध्ययनम्

डा. के.तारकरामकुमारशर्मा

प्राक्तनाः महर्षयः वेदानां संरक्षणाय राजसदनस्य नैकविधानि दुस्तराणि दुर्गाणीव षडङ्गानि निरमासत। दुर्गाणीमानि सुपरिशील्य तत्र प्रवेशमवाप्य वेदसदनं प्रवेष्टव्यं भवति राजसदनमिव। वेदस्तु कल्पतरुरिव समेषां पुरुषाभिलषितानामर्थानां संसाधनाय परमं साधनम्।

तादृश वेदानां संरक्षणं द्विधा वर्तते। शब्दतः अर्थतश्च। तत्र च शब्दतः संरक्षणाय षड्सु अङ्गेषु शिक्षा मुख्यं स्थानम् आवहति। वेदानां शब्दतः संरक्षणे प्रथमं साधनं वेदाध्ययनम्, अध्ययनञ्च गुरुमुखोच्चारणानुच्चारणरूपं न तु पठनमात्रम्। भारतस्य पुरातनं गौरवं यदि सत्यं वयं संरक्षितुकामाः स्मः तर्हि तद्रक्षणाय गुरुमुखोच्चारणानुच्चारणरूपं मुख्यं साधनम् अवश्यमस्माभिः अवलम्बनीयम्। (आधुनिकदृष्ट्या ग्रन्थप्रकाशन शब्दग्रहणयोः आवश्यकता समापतिता, किन्तु नैताभ्यां पुरातनं तद्गौरवं संरक्षितं भवेत्। एवं च गुरुमुखोच्चारणानुच्चारणरूपमेव अध्ययनं कर्तव्यमिति सिद्धम्।)

वेदाध्ययनानन्तरं शब्दतः तेषां संरक्षणाय शिक्षाग्रन्थानामध्ययनं कर्तव्यम्। तत्र शब्दतः संरक्षणार्थं महान् प्रयत्नः आस्थेयः। सुशिक्षित वेदध्वनेः लोकरक्षण शक्तिकत्वात्।

तत्र तैत्तिरीयोपनिषदि "शीक्षां व्याख्यास्यामः.... इत्युक्तः शीक्षाध्यायः"[1]। इति आम्नातं श्रुतिवाक्यं अवलम्ब्य शिक्षाग्रन्थाः प्रवृत्ताः। शिक्ष - विद्योपादाने इति धातोः शिक्षा शब्दः समुत्पन्नः। शिक्ष्यन्ते वेदनीयत्वेन उपदिश्यन्ते स्वरवर्णादयः यत्र सा शिक्षा इत्यर्थः। तत्र वर्णादयः षड्पदार्थाः निरूप्यन्ते। अकारादयो वर्णाः, उदात्तादयः स्वराः, ह्रस्वदीर्घादि मात्राः, स्पृष्टेषत्स्पृष्टादि प्रयत्नो बलम्, अतिद्रुतत्वं अतिविलम्बितत्त्वं च परिहृत्य यस्य वर्णस्य यः कालः उचितः तावति काले तदुच्चारणं साम्यं, तदेव सामशब्देन उच्यते। पूर्वस्य पदस्य उत्तरेण सन्धानं सन्तानः एवं प्रकारेण शिक्षारूपः अध्यायः अध्येतव्यः गुरुमुखोच्चारणानुच्चारणविधया प्राप्तव्यः इति श्रुतेरर्थः।

### अत्र शाङ्करभाष्ये एवं विचारो वर्तते

कर्मभिः संस्कृतचित्तस्य पुरुषस्य उपासनार्थं ब्रह्मावबोधनार्थं च तत्प्रतिपादकः उपनिषद्ग्रन्थः। तस्य च

ग्रन्थस्य अर्थज्ञानप्रधानत्वात् पाठे माभूदौदासीन्यमित्येतदर्थं शिक्षाध्यायः अभिधीयते। भवत्वौदासीन्यमिति चेत् न अनर्थप्रसङ्गात्।

मन्त्रो हीनः स्वरतो[2] ---- इत्यादि वचनात्।

एवं तर्हि कर्मकाण्डेऽप्ययमध्यायः वक्तव्य इति चेत् सत्यम्। अत एव काण्डद्वयशेषत्वात् देहलीप्रदीपन्यायेन उभयोः काण्डयोः मध्ये अभिहितः। न च उभयशेषत्वेन वेदस्य उपक्रमे एव पठ्यतामिति वाच्यम्। उभयशेषस्यापि विद्यायां प्रयोजनाधिक्यद्योतनाय विद्याकाण्डे पठनीयत्वात्। कर्मकाण्डे क्वचित् स्वरवर्णादिव्यत्ययेन यथाशास्त्रम् अर्थानवबोधेऽपि प्रायश्चित्तेन अनुष्ठानवैकल्यं परिहर्तुं शक्यम्। अत एव प्रायश्चित्ताज्याहुतिमन्त्रः एवमाम्नायते -

अनाज्ञातं यदाज्ञातं ---- यथातथम्[3] इति।

विद्याकाण्डे तु अयथाशास्त्रं अर्थावबोधे सति वैकल्यं न समाधीयते। नहि अन्यथा बोदः प्रायश्चित्तेन परिहर्तुं शक्यते। रज्जुसर्पादिभ्रान्तेः गायत्रीजपादिभिः परिहारादर्शनात्। अत एव कर्मस्विव विद्यायां वैकल्यपरिहाराय प्रायश्चित्तं बोद्धुं पाठे प्रयत्नातिशयं विधातुम् अत्रैव शिक्षाध्यायः अभिधीयते। इति।

एवम् अर्थज्ञानात् पूर्वं पाठे प्रयत्नातिशयस्य आवश्यकता निरूपिता। तद्ज्ञानं च शिक्षाग्रन्थैः विना नोपलभ्यते।

शिक्षासु च पाठविशेषकथनात् पूर्वं बाह्यः कश्चन नियमः विहितः वेदपाठसंरक्षणाय -

अध्ययनारम्भे अन्ते च हरिपदसहितमोङ्कारमुच्चरेत् आदौ हरिः ओम् इति सर्वोदात्तत्वेन, अध्ययनावसाने च हरिः ओम् इति रेफोत्तरवर्तिनः इकारस्य स्वरितत्वं इति च शिक्षितं शिक्षाकारैः।

तथा च –

अध्यायस्य मुखे चान्ते भूत्वा विद्वानतन्द्रितः ।
संरक्षणाय वेदानामोङ्कारन्तुच्चरेत्सदा[4] ॥

आद्यन्तप्रणवौ नित्यौ यथा हरिपदं तथा ।।
सविसर्गं हरिपदं प्रणवात्पूर्वमिष्यते ।
हरिशब्दे विसर्गस्य न सन्धिः प्रणवोत्तरे ।।[5]
विसर्गस्यार्धमात्रत्वं विरामो मात्रिकस्मृतः ।
आदौ हरिपदं सर्वमुदात्तञ्चेष्यते बुधैः ।
अन्ते रिशब्दस्वारस्यात् विसर्गः प्रचयस्मृतः ॥ इति।

ततः प्रणवोच्चारणविधेः अनन्तरं वेदराशेः उच्चारणपद्धतिः एवं प्रोक्ता व्यासशिक्षायाम् –

सुव्यक्तः सुस्वरो धैर्यं तच्चित्तत्वं चतुर्गुणाः ।
एतद्युक्तः पठेद्वेदं सवेदफलमश्नुते ॥[6] इति।

**प्रातिशाख्ये च**

नातिव्यक्तं न चाव्यक्तं एवं वर्णानुदीरयेत् ।
पयः पूर्णमिवामत्रं हरन् धीरो यथा मति ॥[7] इति।

एवंविध वेदोच्चारणाय च ?धर्माः षड्विंशतिः प्रोक्ताः? इत्यादिना षड्विंशतिः वर्णधर्माः ज्ञेयत्वेन विहिताः।

तेषु च अष्टौ मुख्याः इति व्यासशिक्षायाम् उक्तम् –

ध्वनिस्थानं च करणं प्रयत्नः कालता स्वरः ।
देवता जातिरेतैश्च वर्णा ज्ञेया विचक्षणैः[8] ॥

प्रातिशाख्ये तत्रापि पञ्चानां मुख्यतमत्वम् उक्तम्।

अनुप्रदानात्संसर्गात् करणविन्ययात्। जायते वर्णवै ध्वनिः
- पञ्चधर्माणां परिचयं कर्तुमिच्छामि -
तेषु पञ्चवर्णधर्मेषु ध्वनिः प्रथमः, सर्ववर्णानां ध्वनेः मूलकारणत्वात् तन्निरूप्यते -

**उक्तं च प्रातिशाख्ये**

शब्दः प्रकृतिः सर्ववर्णानाम्।[9] इति।

द्वयीशक्तिः मनुष्यस्य वर्णोत्पादने ध्वन्युत्पादने च तत्र जननसमकालमेव स वर्णोत्पादनसमर्थो न जायते। तदनन्तरमेव तु पूर्वजातानां व्यवहारेषु, क्रमेण व्युत्पद्यमानः स्वयमपि तदनुकर्तुं प्रयतते। तथा यतमानोऽपि न झटित्येव तस्मै प्रभवति। पुनपुनरभ्यस्यंस्तु कालेन तत्सामर्थ्यम् आत्मनि विन्दति। नैवं प्रयासः वर्तते ध्वनौ। जात एव हि शिशुः श्रुधाद्युपद्रुतोरौति. उपद्रवे उत्कटे अल्पे वा तदनुगुणं ध्वनिमपि उच्चं नीचं वा जनयति। अतः अस्य ध्वन्युत्पादनशक्तिः सहजा निरपेक्षा च। वर्णोत्पादनसामर्थ्यं पुनः अभ्यासाधेयम्। सहजशक्तिश्च आधेयशक्तेः पूर्वमेव कार्यकरणाय अलमिति वर्णोत्पत्तेः पूर्वभावी ध्वनिः।

अत एव वर्णोत्पत्तिहीना अपि तिर्यञ्चः बालमूकादयश्च शब्दैकसाध्यान् व्यवहारान् ध्वनिभिरेव निर्वर्तयन्ति। भाषया चेष्टया च असिध्यत्सु व्यवहारेषु भाषणशक्तानाम् अपि विलक्षणा ध्वनय एव व्यवहारसाधनम्।

**सोऽयं सर्ववर्णप्रकृतिभूतः ध्वनिः त्रिविधः**

नादः - श्वासः - हकारः इति।

तत्र श्वासकोशात् निर्गच्छन् प्राणः शरीरान्तस्थानैः प्रतिहन्यमानः ध्वनिं जनयति। स च कण्ठादधोदेशे प्रायः परश्रोत्रग्रहणायोग्यः, कण्ठदेशे तु, तद्योग्यो जायते। तत्र विनिर्गच्छतः प्राणस्य कण्ठबिलसङ्कोचे पर्याप्तावकाशालाभात् अभिघातः बलवान् निर्गमश्च स्वल्पश्वासस्य ध्वनिस्तु महान् अयमेव नादाख्यः ध्वनिः। कण्ठबिलस्य विकासे तु अवकाशाधिक्यात् अधिकः श्वासः विनिस्सरति। अभिघातश्च दुर्बलः इति ध्वनिरपि ह्रसति। अयमेव श्वासध्वनिः इत्युच्यते। कण्ठबिलस्य मध्यमावस्थायां हकारे उच्चार्यमाणे यादृशः तादृशः पूर्वोक्तोभयविलक्षणः जायते, अयं हकारध्वनिः इत्युच्यते।

एते त्रिविधा ध्वनय एव सर्ववर्णानां प्रकृतिभूता इति उक्तं च प्रातिशाख्ये -

1. संवृते कण्ठे - तावर्णप्रकृतयः[10] इति।
2. स्थानम् –

ध्वन्युत्पत्तेः अनन्तरं मुखस्थावयवेषु एकस्मिन् अवयवे अवयवान्तरस्य संश्लेषेण वर्णोत्पत्तिर्भवति।

तत्र च स्वराणां तत्स्थानं यस्मिन्नवयवे अवयवान्तरस्य उपश्लेषः क्रियते। व्यञ्जनानां तु तत्स्थानं यस्मिन् अवयवे अवयवान्तरस्य स्पर्शनं भवति। हनू - अवर्णस्य। तालु - इवर्णस्य। उत्तरोष्ठः - उवर्णस्य। बर्स्वाः - ऋलृवर्णयोः। एकारैकारयोः हनू तालु च। हनूमूलं कवर्गस्य। तालु चवर्गस्य। मूर्धा - टवर्गस्य। दन्तमूलानि तवर्गस्य। उत्तरोष्ठः पवर्गस्य तालु, दन्तमूलानि, दन्ताः इति अन्तस्थानां क्रमेण। ऊष्माणामपि स्पर्शवर्णानां स्थानान्येव।

**3. करणम्**

वर्णोत्पत्तिस्थानज्ञानानन्तरं तत्साधनज्ञानम् आवश्यकम् तदेव करणमित्युच्यते।

अस्मिन् विषये करणं नाम वर्णोत्पत्तिसाधनभूतमङ्गं तच्च मुखान्तर्वर्ति। तत्र च यदङ्गम् अङ्गान्तरे वक्ता उपसंहरति तत् स्वराणां करणम्। स्वरेभ्यः अन्येषां व्यञ्जनानां तु येन अङ्गेन स्थानं स्पर्शयति तत्करणमिति व्यवस्था। अत्र अचाम् उपसंहारमात्रं व्यञ्जनानां स्पर्शनमिति। यथा कवर्गे उच्चार्यमाणे जिह्वामूलेन हनूमूले स्पर्शनं भवति। अतः कवर्गस्य जिह्वामूलं करणम्। एवमेव अवर्णस्य ओष्ठौ - तालु, जिह्वा च इवर्णस्य - अधरोष्ठः उवर्णस्य - ओष्ठौ, हनू जिह्वा च ऋकारादीनाम् - एकारैकारयोः ओष्ठौ, जिह्वाऽपि - ओकारौकारयोः ओष्ठौ इति। स्वराणाम् उत्पत्तिसाधनभूतानि अङ्गानि। व्यञ्जनानां तु अधरोष्ठ जिह्वाग्र मध्यमूलानि करणानि भवन्ति।

## 4. प्रयत्न

अनेन साधने अस्मिन् स्थाने वर्णः उत्पाद्यः इत्युक्तौ तत्र कस्य च न यत्नस्य अपेक्षा वर्तते। यत्वं विना किमपि न सिद्ध्यति। प्रकृष्टो यत्नः प्रयत्नः, स च वर्णोत्पत्तौ द्विधा भवति। आभ्यन्तरः, बाह्यश्च इति। आभ्यन्तरस्तु स्थानकरणसम्बन्धः, स च स्पृष्ट, अतिस्पृष्ट, ईषन्न्यूनातिस्पृष्ट, ईषत्स्पृष्ट, विवृत, संवृतभेदेन भवति।

बाह्यप्रयत्नस्तु ततः पूर्वभावी। स च नादः, विवारः, संवारः, श्वासः, घोषः, अघोषः, अल्पप्राणः, महाप्राणः इति भवति। उदात्तादिस्वराणाम् अन्तर्भावमत्रैरभिप्रयन्ति वैयाकरणाः। कण्ठस्य सङ्कोच एव संवारो नाम बाह्यप्रयत्नः। तस्मिन् सति नादाख्यो बाह्यप्रयत्नः उत्पाद्यते। नादध्वनिसंसर्गात् व्यञ्जनेषु घोषो नाम बाह्यप्रयत्नो जायते।

कण्ठस्य विस्तरणं विवाराख्यो बाह्यप्रयत्नः। तस्मिन् सति श्वासो नाम बाह्यप्रयत्नः क्रियते। न ध्वनिसंसर्गात् अघोषो नाम बाह्यप्रयत्नो जायते।

कण्ठे मध्यमप्रकारेण अवस्थिते हकारो नाम बाह्यप्रयत्नः क्रियते। तेन च व्यञ्जनेषु घोषाख्यो बाह्यप्रयत्नो जायते।

घोषवद्वर्णेषु ह चतुर्थाः महाप्राणाख्य बाह्यप्रयत्नविशिष्टाः इतरे अल्पप्राणाः।

अघोषवर्णेषु प्रथमवर्णाः अल्पप्राणाः इतरे महाप्राणाः उक्तं च प्रातिशाख्ये - महति वायौ महाप्राणा अल्पेवायावल्पप्राणाः इति।

एवं च हल्वर्णेषु व्युत्पाद्येषु चत्वारः बाह्यप्रयत्नाः। एकः आभ्यन्तरप्रयत्नश्च क्रियते। अज्वर्णेषु तु द्वौ बाह्यप्रयत्नौ एकः आभ्यन्तरप्रयत्न इति व्यवस्था। अत्र शिक्षाकाराः -

स्वराणामूष्माणां चैव
संवृतत्त्वमकारस्य
स्पर्शास्पृष्टता
अतिस्पृष्टो।

## 5. काल

वर्णविशेषोत्पत्तये कालोऽपि मुख्यं स्थानं निर्वहति। उक्तं शिक्षायाम् -

प्रयत्नात्कलतश्चोक्तास्तद्वर्णा उद्भवन्ति हि ।
तदभावे वर्णाभावः सम्ग्ज्ञेयं द्वयं ततः ॥[11]

केवलस्थानकरणप्रयत्नैः स्वरस्य दीर्घादिकं न भवति। अतः दीर्घादिसिद्धये कालविधिः। दीर्घादयश्च ह्रस्ववर्णेभ्यः पृथग्वर्णत्वेन परिगणिताः। अत एव प्रातिशाख्ये ▱षोडशादितः स्वराः▱ इति षोडशसंख्यामात्रावैषम्यात्।

अपि च - वेदवाक्यानाम् उच्चारणाय तिस्रो वृत्तयः विहिताः, कुत्र कुत्र का वृत्तिराश्रयणीया इति च। ताश्च शीघ्रोच्चारणम् - विलम्बितोच्चारणम् - साम्येन उच्चारणम् इति।

शीघ्रं विलम्बितं मध्यं तिस्रो वाक्यस्य वृत्तयः ।[12]
अभ्यासार्थे द्रुतां ....

यस्मिन् काले या वृत्तिः विहिता तस्मिन्नेव काले ततः अन्या वृत्तिराश्रिता चेत् तदा कालान्तरवृत्याश्रयणात् कर्मान्यता भवेत्। ततश्च शास्त्रातिलङ्घनप्रयुक्त दोषः स्यात्। तद्दोषपरिहाराय स्थानकरणप्रयत्नैः साकं कालविज्ञानमप्यावश्यकम्। कालनिर्णयश्च वर्णानां मध्यमवृत्तिमाश्रित्य कृतः। प्रतिशाख्ये नानाशिक्षासु च।

मध्यमां वृत्तमाश्रित्य चैवं कालास्सुनिश्चिताः इति।
प्रतिशाख्यादिषु ह्यत्र वृत्तिः सैव समाश्रिता ॥[13] इति

अचां मध्ये - अ, इ, उ, ऋ, ऌ इत्येते एकमात्राकालिकाः। आ, ई, ऊ, ॠ, ए, ऐ, ओ,औ, इत्येते द्विमात्राः। हवी ३ श्शमितः[14], पशू ३ र्न इत्यादिषु अन्त्यस्वराः त्रिमात्रा स्युः। शुश्लोक - यशो मम इत्यादिषु अन्ते वर्तमानः अकारः चतुर्मात्राकालः - व्यञ्जनानां तु साधारण्येन अर्धमात्राकालः। किन्तु हल्युक्तं हलुत्तरं तदनुमात्रं प्रकीर्तितम्▱इत्यादि शिक्षावचनैः व्यञ्जनानां अणु, एक, द्विमात्राकाला अप्युक्ताः।

मात्राकालस्य परिमाणज्ञानं विना तावन्तं कालं वर्णोच्चारणं नैव शक्यते। अतः तत्परिमाणं शिक्षा एवमुपदिशति।

चाषोक्त एकमात्रस्यात्[15].....

चाषऋतकालस्य सुखेन निर्णेतुमशक्यत्वात् सुखेन कालपरिमाणं ज्ञातुं अन्यापि कारिका वर्तते।

अङ्गुलिस्फुटनं यावान् तावान् कालस्तु मात्रिकः
कालोऽतिसूक्ष्मकोऽणुस्यात् मात्रार्धं व्यक्तमात्रिकम् ॥[16]
इति।

अयं भावः - अङ्गुल्योः सङ्घट्टनाय यावान् कालः पर्याप्तो भवति सः एकमात्राकाल इत्युच्यते। कालस्य अभिव्यक्तिस्तु अर्धमात्राकालादारभ्यैव भवति। अणुकालस्य व्यक्तिः न भवति -उक्तं च

इन्द्रियाविषयो योऽसावणुरित्युच्यते बुधैः। इति।

वैदिकवर्णानां विशेषज्ञानम् अवश्यं सम्पादनीयम्। यतः लौकिकैः वचोभिः वयं देवं प्रार्थयामः चेत् तत्र एतावान् विचारो नास्ति। यदि वैदिकैर्वचोभिः प्रार्थयितुम् उद्युक्ताः। तर्हि तत्र वर्णानां लोपागमविकारकादीनां विज्ञानं सम्पादनीयमेव, सुशिक्षितवेदवचसामेफलोदयकथनात् लौकिकवचोभिः यागादिकं न क्रियते।

## 7. देवता

अकारादिवर्णराशिं पञ्चधा विभज्य तेषां पञ्चानामपि राशीनां क्रमेण वायुः, अग्निः, भूमिः, चन्द्रः, सूर्यः च अधिदेवतावेदितव्या इत्यभिधाय कारिकाः एवं प्रदर्शिताः -
अदादेत्प्रथमयशा दशा वाय्वधिदेवताः इत्यादिना। एवं अधिष्ठानदेवताविज्ञाय यथा विहितं तत्स्मरणपूर्वकं मन्त्राध्ययनेन तत्तदधिष्ठानदेवताः तृप्ता भूत्वा प्रकृतिवैपरीत्यात् लोकान् संरक्षन्ति। अयथा स्मरणं विस्मरणं वा अधिदेवतानां तासां प्रकोपाय भवति। तेन भूप्रकम्पनादि प्रकृतिवैपरीत्यात् लोकानामुपद्रवः सम्भवति। तत्परिहाराय वेदाध्ययनकाले अध्येतृभिः तत्तद्वर्णाधिष्ठातृदेवताः स्मर्तव्याः।

**अन्यच्च**

शुभशब्देषु परेषु अध्ययनस्य विश्रमः कर्तव्यः इति नियमः वर्तते - स्थापितव्याः शुभावर्णाः इत्यादिना। तत्र च शुभशब्दनिर्णयाय अधिदेवतापरिशीलनमपि कार्यम्। अग्निदेवताकेषु, सूर्यदेवताकेषु च वर्णेषु परेषु नैव स्थापनीयमिति नियमात् तदितरदेवताकेषु वर्णेष्वेव विश्रमः कार्यः शुभफलावाप्तये।

## 8. जातिः

एवं प्रति वर्णं देवतास्वरूपे अवगते, वर्णेषु जातयः अवगन्तव्याः - अचः सर्वे वर्गप्रथमद्वितीयवर्णाश्च ब्राह्मणजातयः वर्गतृतीयचतुर्थवर्णाः क्षत्रियजातयः वर्गोत्तमाः अन्तस्थाश्च वैश्यजातयः, अनुस्वारविसर्गोष्माणः रुद्रजातय इति व्यवस्था।

स्वराश्च प्रथमाश्चैव[17]....

एवं च अकारादिवर्णानां या या जातयो निशचिताः तासामुच्चारणावसरे व्यतिक्रमे तत्संहारकत्वदोषः प्रदर्शितः। तत्तज्जात्युच्चारणे तत्तज्जातिपरिरक्षणं भवति इति सूत्रकारः अनुशास्ति-

यज्जात्युच्चारणे तेषां तज्जातिपरिरक्षणम् ।
यदन्यजातिरुच्येतत्तत्संहारको भवेत् ॥[18] इति।
संहितापदवर्णानां कालादीनां च लक्षणम् ।
हस्विसर्गाच् स्वराणां च सन्धेर्लक्षणमेव च ॥
एतानि सम्यगष्टौ च विदित्वा लक्षणानि यः ।
अध्यायं सपठत्येव द्वितीयं ब्रह्म कथ्यते[19] ॥

## उपयुक्तग्रन्थसूची


1. तैत्तिरीयप्रातिशाख्यम् – रङ्गाचार्यः, प्राच्यग्रन्थालयः, मैसूरु, 1906
2. व्यासशिक्षा – वेदमीमांसानुसन्धानकेन्द्रम्, वारणासी
3. पाणिनीयशिक्षा – चौखम्बाविद्याभवन्, वारणासी
4. कौण्डिन्यशिक्षा – श्रीशङ्करगुरुकुलवेदपाठशाला, वेदभवनम्, हैदराबाद् - 2016
5. आत्रेयशिक्षा
6. तैत्तिरीयोपनिषत् - चौखम्बाविद्याभवन्, वारणासी
7. तैत्तिरीय ब्राह्मणम् - चौखम्बाविद्याभवन्, वारणासी

   तैत्तिरीयसंहिता - चौखम्बाविद्याभवन्, वारणासी


## सन्दर्भसूची

---

[1] तै.उ.1.2.1

[2] पाणिनीयशिक्षा - 52

[3] तैत्तिरीयब्राह्मणम् -

[4] व्यासशिक्षा – 505-506

[5] कौण्डिन्यशिक्षा - 92

[6] व्यासशिक्षा – 503-504

[7] तैत्तिरीयप्रातिशाख्यम् – 17-8

[8] व्यासशिक्षा – 511-512

[9] तैत्तिरीयप्रातिशाख्यम्- 22-1

[10] तैत्तिरीयप्रातिशाख्यम् - 4-7

[11] व्यासशिक्षा – 477-478

[12] व्यासशिक्षा - 475

[13] व्यासशिक्षा – 479-480

[14] तैत्तिरीयसंहिता – 6-3-10-1

[15] व्यासशिक्षा – 441

[16] व्यासशिक्षा – 444-445

[17] व्यासशिक्षा – 495

[18] व्यासशिक्षा – 499-500

[19] व्यासशिक्षा – 517-520